श्री नृसिंह कवचं (प्रह्लाद कृतं)

श्री नृसिंह कवचं (प्रह्लाद कृतं)

नृसिंहकवचं वक्ष्ये प्रह्लादेनोदितं पुरा |
सर्वरक्षाकरं पुण्यं सर्वोपद्रवनाशनं || 1 ||

सर्वसंपत्करं चैव स्वर्गमोक्षप्रदायकं |
ध्यात्वा नृसिंहं देवेशं हेमसिंहासनस्थितं || 2 ||

विवृतास्यं त्रिनयनं शरदिंदुसमप्रभं |
लक्ष्म्यालिंगितवामांगं विभूतिभिरुपाश्रितं || 3 ||

चतुर्भुजं कोमलांगं स्वर्णकुंडलशोभितं |
सरोजशोभितोरस्कं रत्नकेयूरमुद्रितं || 4 ||

तप्तकांचनसंकाशं पीतनिर्मलवाससं |
इंद्रादिसुरमौळिस्थस्फुरन्माणिक्यदीप्तिभिः || 5 ||

विराजितपदद्वंद्वं शंखचक्रादिहेतिभिः |
गरुत्मता सविनयं स्तूयमानं मुदान्वितं || 6 ||

स्वहृत्कमलसंवासं कृत्वा तु कवचं पठेत् |
नृसिंहो मे शिरः पातु लोकरक्षात्मसंभवः || 7 ||

सर्वगोऽपि स्तंभवासः फालं मे रक्षतु ध्वनिं |
नृसिंहो मे दृशौ पातु सोमसूर्याग्निलोचनः || 8 ||

स्मृतिं मे पातु नृहरिर्मुनिवर्यस्तुतिप्रियः |
नासां मे सिंहनासस्तु मुखं लक्ष्मीमुखप्रियः || 9 ||

सर्वविद्याधिपः पातु नृसिंहो रसनां मम |
वक्त्रं पात्विंदुवदनः सदा प्रह्लादवंदितः || 10 ||

नृसिंहः पातु मे कंठं स्कंधौ भूभरणांतकृत् |
दिव्यास्त्रशोभितभुजो नृसिंहः पातु मे भुजौ || 11 ||

करौ मे देववरदो नृसिंहः पातु सर्वतः |
हृदयं योगिसाध्यश्च निवासं पातु मे हरिः || 12 ||

मध्यं पातु हिरण्याक्षवक्षःकुक्षिविदारणः |
नाभिं मे पातु नृहरिः स्वनाभिब्रह्मसंस्तुतः || 13 ||

ब्रह्मांडकोटयः कट्यां यस्यासौ पातु मे कटिं |
गुह्यं मे पातु गुह्यानां मंत्राणां गुह्यरूपधृक् || 14 ||

ऊरू मनोभवः पातु जानुनी नररूपधृक् |
जंघे पातु धराभारहर्ता योऽसौ नृकेसरी || 15 ||

सुरराज्यप्रदः पातु पादौ मे नृहरीश्वरः |
सहस्रशीर्षा पुरुषः पातु मे सर्वशस्तनुं || 16 ||

महोग्रः पूर्वतः पातु महावीराग्रजोऽग्नितः |
महाविष्णुर्दक्षिणे तु महाज्वालस्तु नैर्ऋतौ || 17 ||

पश्चिमे पातु सर्वेशो दिशि मे सर्वतोमुखः |
नृसिंहः पातु वायव्यां सौम्यां भूषणविग्रहः || 18 ||

ईशान्यां पातु भद्रो मे सर्वमंगळदायकः |
संसारभयदः पातु मृत्योर्मृत्युर्नृकेसरी || 19 ||

इदं नृसिंहकवचं प्रह्लादमुखमंडितं |
भक्तिमान्यः पठेन्नित्यं सर्वपापैः प्रमुच्यते || 20 ||

पुत्रवान् धनवान् लोके दीर्घायुरुपजायते |
यं यं कामयते कामं तं तं प्राप्नोत्यसंशयं || 21 ||

सर्वत्र जयमाप्नोति सर्वत्र विजयी भवेत् |
भूम्यंतरिक्षदिव्यानां ग्रहाणां विनिवारणं || 22 ||

वृश्चिकोरगसंभूतविषापहरणं परं |
ब्रह्मराक्षसयक्षाणां दूरोत्सारणकारणं || 23 ||

भूर्जे वा ताळपत्रे वा कवचं लिखितं शुभं |
करमूले धृतं येन सिध्येयुः कर्मसिद्धयः || 24 ||

देवासुरमनुष्येषु स्वं स्वमेव जयं लभेत् |
एकसंध्यं त्रिसंध्यं वा यः पठेन्नियतो नरः || 25 ||

सर्वमंगळमांगळ्यं भुक्तिं मुक्तिं च विंदति |
द्वात्रिंशच्च सहस्राणि पठेच्छुद्धात्मनां नृणां || 26 ||

कवचस्यास्य मंत्रस्य मंत्रसिद्धिः प्रजायते |
अनेन मंत्रराजेन कृत्वा भस्माभिमंत्रणं || 27 ||

तिलकं विन्यसेद्यस्तु तस्य ग्रहभयं हरेत् |
त्रिवारं जपमानस्तु दत्तं वार्यभिमंत्र्य च || 28 ||

प्राशयेद्यो नरो मंत्रं नृसिंहध्यानमाचरेत् |
तस्य रोगाः प्रणश्यंति ये च स्युः कुक्षिसंभवाः || 29 ||

किमत्र बहुनोक्तेन नृसिंहसदृशो भवेत् |
मनसा चिंतितं यत्तु स तच्चाप्नोत्यसंशयं || 30 ||

गर्जंतं गर्जयंतं निजभुजपटलं स्फोटयंतं हटंतं
रूप्यंतं तापयंतं दिवि भुवि दितिजं क्षेपयंतं क्षिपंतं |
क्रंदंतं रोषयंतं दिशि दिशि सततं संहरंतं भरंतं
वीक्षंतं घूर्णयंतं शरनिकरशतैर्दिव्यसिंहं नमामि || 31 ||

इति श्रीब्रह्मांडपुराणे प्रह्लादोक्तं श्री नृसिंह कवचं |